गान्धारः, पुं, (गन्ध एव गान्धो गन्धकस्तं ऋच्छति उत्पत्तिकारणत्वेन गच्छतीति । ऋ गतौ+ अण् ।) सिन्दूरम् । जम्बुद्वीपस्योत्तरदेशः । कान्धार इति भाषा । इति मेदिनी । रे । १६६ ॥ (देशोऽयं बृहत्संहितायां कूर्म्मविभागे उत्तरस्यामुक्तः । यथा, तत्रैव । १४ । २८ ।

"उत्तरतः कैलासः ।" इत्युपक्रम्य,—

"गान्धारयशोवतिहेमतालराजन्यखचरगव्याश्च॥"

इत्युक्तवान् । दुर्य्योधनमातुलः शकुनिस्तु एतद्देशस्य राजासीत् । यथा, महाभारते । ३ । २३७ । २१ ।

"गान्धारराजः शकुनिः प्रत्युवाच हसन्निव ॥"*॥ गन्ध एव गान्धः । स्वार्थे अण् । तं ऋच्छतीति । "कर्म्मण्यण् ।" ३ । २ । १ । इत्यण् ।) सप्तस्वरान्तर्गततृतीयस्वरः । स तु छागस्वरतुल्यः । (यदुक्तं सङ्गीतशास्त्रे ।

"षड्जं रौति मयूरस्तु गावो नर्द्दन्ति चर्षभम् ।

गान्धारन्तु अजो रौति क्रौञ्चः क्वणति मध्यमम्॥")

तस्योत्पत्त्यादिः ।

"वायुः समुद्गतो नाभेः कण्ठशीर्षसमाहतः ।

नानागन्धवहः पुण्यो गान्धारस्तेन हेतुना ॥"

इति भरतः ॥

अपि च ।

"नाभेः समुद्गतो वायुर्गन्धं श्रोत्रे च चालयन् ।

स शब्दस्तेन निर्य्याति गान्धारस्तेन कथ्यते ॥

चतस्रः पञ्चमे षड्जे मध्यमे श्रुतयो मताः ।

ऋषभे धैवते तिस्रो द्वे गान्धारनिषादके ॥"

(अयन्तु देवकुलसम्भूतो वैश्यजातिः स्वर्णवद्बहुलपीतवर्णः । अस्य जन्म कुशद्वीपे, ऋषिः शशाङ्कः, सरस्वती देवता, त्रिष्टुप् छन्दः । करुणरसे एवास्य उपयोगित्वम् ॥ इति सङ्गीतदर्पणे । ८३—६१ ॥ * ॥ स्वरग्रामविशेषः । तल्लक्षणम् । यथा, तत्रैव ७६—८० ।

"रि-मयोः श्रुतिमेकैकां गान्धारश्चेत् समाश्रयेत् ।

प-श्रुतिं धो निषादस्तु ध-श्रुतिं स-श्रुतिं श्रितः ॥

गान्धारग्राममाचष्ट तदा तं नारदो मुनिः ।

प्रवर्त्तते स्वर्गलोके ग्रामोऽसौ न महीतले ॥"*॥)

रागविशेषः । तस्य रूपं यथा, सङ्गीतदामोदरे ।

"जटां दधानः सितभूतिभूषणः

काषायवासास्तनुदेहयष्टिः ।

सयोगपट्टः सततैकमुद्री

गान्धाररागः कथितस्तपस्वी ॥"

स तु भैरवरागपुत्त्रः । प्रभाते तस्य गानसमयः ॥

गान्धारराजः, पुं, (गान्धारस्य देशविशेषस्य राजा । "राजाहस्सखिभ्यष्टच् ।"५ । ४ । ६१ । इति टच् ।) शकुनिः । (यथा, महाभारते । ३ । २३७ । २१ ।

"गान्धारराजः शकुनिः प्रत्युवाच हसन्निव ॥"

अस्य पित्रादयोऽपि । यथा, तत्रैव । १।११०।१४।

"ततो गान्धारराजस्य पुत्त्रः शकुनिरभ्ययात् ॥")

गान्धारी, स्त्री, (गान्धारस्य गान्धारराजस्य अपत्यं स्त्री । इञ् ततो ङीष् ।) धृतराष्ट्रराजपत्नी । सा तु दुर्य्योधनमाता । इति महाभारतम् ॥ (इयं हि हरमाराध्य शतपुत्त्रवरं लब्धवती । यथा, महाभारते । १ । ११० । ६ ।

"अथ शुश्राव विप्रेभ्यो गान्धारी सुबलात्मजाम् ।

आराध्य वरदं देवं भगनेत्रहरं हरम् ॥

गान्धारी किल पुत्त्राणां शतं लेभे वरं शुभा ॥"

पार्व्वतीसहचरीभेदः । यथा, तत्रैव ।३।२३०।४८।

"गौरी विद्याथ गान्धारी केशिनी मित्रसाह्वया ॥"

गायत्त्रीस्वरूपा महादेवी । यथा, देवीभागवते । १२ । ६ । ४० ।

"गायत्त्री गोमती गीता गान्धारी गानलोलुपा ॥"

गङ्गा । यथा, काशीखण्डे । २६ । ५१ ।

"गान्धारी गर्व्वशमनी गतिभ्रष्टगतिप्रदा ॥"

"गां धारयतीति गान्धारी ।" इति तट्टीका ॥ नाड़ीविशेषः । यथा, सङ्गीतदर्पणे । २६ ।

"सुषुम्नेड़ा पिङ्गला च कुहूरथ पयस्विनी ।

गान्धारी हस्तिजिह्वा च वारणाथ यशस्विनी ॥")

जिनानां शासनदेवताविशेषः । इति हेमचन्द्रः ॥ यवासः । इति राजनिर्घण्टः ॥ दुरालभा । इति भावप्रकाशः ॥ मादकद्रव्यविशेषः । गाँजा इति भाषा ॥ इति विशुद्धिसिद्धान्तसारावलीवैद्यकग्रन्थः ॥

गान्धारेयः, पुं, (गान्धार्य्या अपत्यं पुमान् । "स्त्रीभ्यो ढक् ।"४।१।१२० । इति ढक् ।) दुर्य्योधनराजः । इति त्रिकाण्डशेषः ॥ (दुःशासनादयोऽपि ॥)

गान्धिकः, पुं, (गन्धयते परप्रार्थनां गच्छतीति । गन्ध क ङ गतौ + णिनिः । ततः स्वार्थे कन् । यद्वा, गन्धो गर्व्वोऽस्यास्तीति । गन्ध+"अत इनिठनौ ।" ५ । २ । ११५ । इति ठन् ।) लेखकः । सुगन्धिद्रव्यव्यवहारी । गन्धवणिक् इति ख्यातः । इति मेदिनी । के । ८३ ॥ स तु अम्बष्ठात् राजपुत्त्र्यां जातः । इति पराशरपद्धतिः ॥ (अयं हि नायकस्य शृङ्गारसहायेषु अन्यतमः । यथा, साहित्यदर्पणे । ३ । ४६ ।

"शृङ्गारस्य सहाया विटचेटविदूषकाद्याः स्युः ।

भक्ता नर्म्मसु निपुणाः कुपितवधूमानभञ्जनाः शुद्धाः ॥

आदिशब्दात् मालाकाररजकताम्बूलिकगान्धिकादयः ॥") कीटविशेषः । इति शब्दरत्नावली ॥ गँधिपोका इति भाषा ॥ (गान्धं गन्धप्रधानं द्रव्यमस्यास्ति । ठन् । गन्धप्रधानद्रव्यविशिष्टे त्रि । यथा, पञ्चतन्त्रे । १ । १३ । [दिभिः ।

"पण्यानां गान्धिकं पण्यं किमन्यैः काञ्चनायत्रैकेन च यत् क्रीतं तच्छतेन प्रदीयते ॥")

गामुकः, त्रि, (गच्छतीति । गम गतौ + "लषपतपदेति ।" ३ । ३ । १५४ । इति उकञ् ।) गन्ता । इति व्याकरणम् ॥

गाम्भीर्य्यं, क्ली, (गम्भीरस्य भावो गम्भीरे भवं वा । "गम्भीराञ्ञ्यः ।" ४ । ३ । ५८ । इति ञ्यः ।) गभीरता । यथा,—

"भवनिर्घोषगाम्भीर्य्यं प्रतिनादविधायिता ।"

इति जिनवाग्गुणे हेमचन्द्रः ॥

(इदं हि नायकस्य सात्त्विकगुणविशेषः । यथा, साहित्यदर्पणे । ३ । ५८ ।

"शोभा विलासो माधुर्य्यं गाम्भीर्य्यं धैर्य्यतेजसी ।

ललितौदार्य्यमित्यष्टौ सत्त्वजाः पौरुषा गुणाः ॥"

तस्य लक्षणम् । यथा, तत्रैव । ३ । ६२ ।

"भीशोकक्रोधहर्षाद्यैर्गाम्भीर्य्यं निर्व्विकारता ॥"

उदाहरणम् । यथा,—

"आहूतस्याभिषेकाय विसृष्टस्य वनाय च ।

न मया लक्षितस्तस्य स्वल्पोऽप्याकारविभ्रमः ॥")

गायकः, त्रि, (गायतीति । गै गाने+ण्वुल् ।) गानकर्त्ता । इति शब्दरत्नावली ॥ (यथा, माघे । ११ । १० ।

"कलमविकलतालं गायकैर्बोधहेतोः ॥")

तत्पर्य्यायः । गायनः २ गाथकः ३ । इति त्रिकाण्डशेषः ॥ गाता ४ । तस्य दोषा यथा,—

"लज्जितं भीतसन्त्रस्तं अव्यक्तमनुनासिकम् ।

काकस्वरः शिरःकम्पो लयस्थानविवर्ज्जितम् ॥

विस्वरं विरसञ्चैव विश्लिष्टं विषमाहतम् ।

व्याकुलं तालहीनञ्च गातुर्दोषाश्चतुर्द्दश ॥"

इति सङ्गीतदामोदरः ॥

गायत्त्री, [न्] पुं, (गायन्तं त्रायते इति । गायत् + त्रै + णिनिः । आलोपात् साधुः ।) खदिरवृक्षः । इति भरतः ॥ (खदिरशब्दे गुणादिकं ज्ञेयम् ॥ गायत्त्रं स्तोत्रमस्यास्तीति गायत्त्र+ "अत इनिठनौ ।" ५ । २ । ११५ । इति इनिः । उद्गातरि सामगायके त्रि । यथा, ऋग्वेदे । १ । १० । १ ।

"गायन्ति त्वा गायत्त्रिणोऽर्च्चन्त्यर्कमर्किणः ॥")

गायत्त्री, स्त्री, (गायन्तं त्रायते इति । त्रै ङ पालने + "आतोऽनुपसर्गे कः ।" ३ । २ । ३ इति कः । ततो गौरादित्वात् ङीष् ।) खदिरवृक्षः । इत्यमरः । २ । ४ । ४६ ॥ (यथा, वैद्यके हृद्दमञ्जिष्ठादिक्वाथे ।

"मञ्जिष्ठादारुकलिङ्गभृङ्गमगधा त्रायन्ति पाठावरी गायत्त्री त्रिफलाकिरातकभद्दानिम्बासनारग्वधम् ॥")

षड्‌स्वरच्छन्दोविशेषः । तस्याष्टत्रिंशद्विधा यथा । तनुमध्या १ शशिवदना २ सोमराजी ३। आद्यायाः आद्यन्तयोर्गुरुद्वये मध्ये लघुद्वयम् ॥ द्वितीयायाः आदिमध्ययोर्लघुद्वये अन्ते गुरुद्वयम् ॥ तृतीयायाः आदिमध्यगोर्लघुगुरू गुरुलघू अन्ते गुरुद्वयम् ॥ क्रमेणोदाहरणानि यथा । कान्ता मम चित्ते नित्यं तनुमध्या ॥ १ ॥ शशिवदनानां व्रजतरुणीनाम् ॥ २ ॥ हरे सोमराजी समा ते यशःश्रीः ॥ ३ ॥ इति छन्दोमञ्जरी ॥*॥ दुर्गा । यथा,—

"गायनाद्गमनाच्चापि गायत्त्री त्रिदशार्च्चिता ।

साधनात् सिद्धिरित्युक्ता साधका वाथ ईश्वरी ॥"

इति देवीपुराणे देवीनिरुक्तनाम ४५ अध्यायः ॥ (सा च गायत्त्रीरूपेण ब्रह्मणैव वर्त्तते । यथा, देवीभागवते । ७ । ३० । ८१ ।

"गायत्त्री वेदवदने पार्व्वती शिवसन्निधौ ॥"*॥